वटुकभैरवस्तोत्र

(बटुकभैरवस्तोत्रप्रारम्भः)

ॐश्रीगणेशायनमः ॐश्रीगुरवेशिवायोंनमः ॐश्रीभैर
वायनमः ॐमन्दरस्थंसुखासीनंदेवदेवंजगद्गुरुम् शंकरं
परिपप्रच्छपार्वतीपरमेश्वरम् १ श्रीपार्वत्युवाच भगवन्स
र्वधर्मज्ञसर्वशास्त्रागमादिषु आपदुद्धारणंमंत्रंसर्वसिद्धिक
रंनृणाम् २ सर्वेषामेवभूतानांहितार्थंवांछितंमया विशे
षेणतुराज्ञांवैशांतिपुष्टिप्रसाधकम् अंगन्यासकरन्यास
देहन्याससमन्वितम् वक्तुमर्हसिदेवेशममहर्षविवर्धन
म् ४ श्रीशिवउवाच शृणुदेविमहामंत्रमापदुद्धारहेतु
कम् सर्वदुःखप्रशमनंसर्वशत्रुविनाशनम् ५ अपस्मार

श्री॰ दिरोगाणां सर्वशत्रुविनाशनम् ज्वरादीनां विशेषतः ।
१ नाशनं स्मृतिमात्रेण मंत्रराजमिमं प्रिये ६ ग्रहराजभया
नां च नाशनं सुखवर्धनम् स्नेहाद्वक्ष्यामि ते मंत्रं सर्वसार
मिमं प्रिये सर्वकामार्थदं पुण्यं राज्यभोगप्रदं नृणाम् आ
पदुद्धारमिति यन्मंत्रं वक्ष्याम्यशेषतः ७ प्रणवं पूर्वमु
द्धृत्य देवीप्रणवमुद्धरेत् वटुकायेति वै पश्चादापदुद्धा
रणाय च ८ कुरुद्वयं ततः पश्चाद्वटुकाय पदं वदेत् देवी
प्रणवमुद्धृत्य मंत्रोद्धारमिदं प्रिये ९ इत्युद्धारः । प्रकाशे ।
ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ॥

मंत्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम् अप्रकाश्यमि
दं मंत्रं सर्वशक्तिसमन्वितम् स्मरणादेव मंत्रस्य भूतप्रेत
पिशाचकाः विद्रवन्त्यति भीता वै कालरुद्रादिवप्रजाः १२
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम् नाग्निचोरभयं त
त्र ग्रहराजभयं तथा १३ न च मारीभयं किंचित्सर्वत्र सुखवा
न्भवेत् आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिसंपदः १४ भवंति
सततं तस्य पुस्तकस्यापि पूजयैत् एष वै भैरवो नाम आप
दुद्धारणो मतः १५ श्रीपार्वत्युवाच त्वया च कथितो देवो भै
रवः कल्पउत्तमः तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च १६

श्री॰ सारमुद्धृत्यतेषांवैनामाष्टशतकंवद यानिसंकीर्तयन्मर्त्यः
२ सर्वदुःखविवर्जितः १७ सर्वान्कामानवाप्नोतिसाधकःसिद्धि
2 मेवच श्रीईश्वरउवाच शृणुदेविप्रवक्ष्यामिभैरवस्यम
हात्मनः १८ आपदुद्धारणस्येहनामाष्टशतमुत्तमम् ।
सर्वपापहरंपुण्यंसर्वापद्विनिवारणम् १९ सर्वकामार्थ
दंदेविसाधकानांसुखावहम् सर्वमंगलमांगल्यंसर्वोपद्रव
नाशनम् २० आयुष्करंपुष्टिकरंश्रीकरंचयशस्करम् ना
माष्टशतकस्यास्यऋषिरारण्यकोवृहत् २१ छंदोनुष्टुप् ।
समाख्यातंदेवोवटुकभैरवः अष्टबाहुंत्रिनयनमितिबी

जंसमीरितम् २२ शक्तिः कंकीलकं शेषमिष्टसिद्धौ वियोजयेत् रुद्रमंगुष्ठयोर्न्यस्य तर्जन्योस्तु शिखीसखम् २३ शिवं मध्यमयोर्न्यस्यानामयोस्तु त्रिशूलिनम् ब्रह्माणं तु कनिष्ठायां तलयोस्त्रिपुरांतकम् २४ मांसाशिनं कराग्रे तु करपृष्ठे दिगंबरम् भैरवं मूर्ध्नि विन्यस्य ललाटे भीमदर्शनम् नेत्रयोर्भूतहननं नसारमेयानुगं भ्रुवोः कर्णयोर्भूतनाथं च प्रेतवाहं कपोलयोः २६ नासापुटोष्ठयोश्चैव भस्मांगं सर्पभूषणम् प्रनादिनाथमास्ये च शक्तिहस्तं गले न्यसेत् २७ स्कंधयोर्दैत्यशमनं बाह्वोरतुलतेजसम् पाण्योः कपालिनं न्यस्य हृदये मुं

श्री· उमालिनम् २८ शांतं वक्षः स्थले न्यस्य स्तनयोः कामचा
२ रिणम् उदरे च सदातुष्टं नेत्रेशं पार्श्वयोस्तथा २९ नेत्रपा
3 लं पृष्ठदेशे क्षेत्रज्ञं नाभिदेशके पापोघशमनं कल्पां वटुकं
लिंगदेशके गुदे रत्नाकरं न्यस्य तथोर्वी रक्तलोचनम् जा
नुनोर्घुंघुरारावं जंघयोरक्तपायिनम् ३१ गुल्फयोः पादुका
सिद्धं पादपृष्ठे सुरेश्वरम् अपादमस्तकं चैव आपदुद्धारणं
न्यसेत् ३२ पूर्वे डमरुहस्तं च दक्षिणे दंडधारिणम् खड्गह
स्तं पश्चिमे च घंटाधारिणमुत्तरे ३३ आग्नेय्यामग्निवर्णं च नैरृ
त्यां च दिगंबरम् वायव्यां सर्वभूतस्थमीशान्यामिष्टसिद्धिदम् ३४

ऊर्ध्वखेचारिणं न्यस्य पाताले रौद्ररूपिणम् एवं विन्यस्य पां
तौल्लें देहे स्वषडंगेषु ततो न्यसेत् २५ हृदये भूतनाथाय आ
दिनाथाय मूर्धनि आनंदपदपूर्वाय नाथाय च शिखासु च २६
सिद्धसाधकनाथाय कवचे विन्यसेत्तथा सहजानंदनाथा
य न्यसेन्नेत्रत्रये तथा निस्सीमानंदनाथाय अस्त्रे चैव प्रयो
जयेत् एवं न्यासविधिं कृत्वा ध्यायेच्चैव ततः प्रिये २७ ध्या
नं तस्य प्रवक्ष्यामि यथाध्यानं जपेन्नरः ॥ इत्युद्धारः ॥ प्रका
शम् ॥ ॐ अस्य श्रीवटुकभैरवापदुद्धारणनामाष्टशतना
मस्तोत्रमंत्रस्य बृहदारण्यक ऋषिः अनुष्टुप् छंदः श्री आप

श्री॰ ४

हुङ्कारणोवटुकभैरवोदेवता: कँ शक्तिः अष्टबाहुंत्रिन
यनमितिबीजं शेषंकीलकम् इष्टसिद्ध्यर्थे पाठेजपेविनि
योगः इतिकृतांजलिःस्मृत्वान्यसेत् वृहदारण्यकऋषये
नमःशिरसि अनुष्टुप्छंदसेनमोमुखे आपदुद्धारणोव
टुकभैरवोदेवतायैनमोहृदये कँ शक्तयेनमः पादयोः
अष्टबाहुंत्रिनयनमितिबीजायनमोगुह्ये शेषमितिकी
लकायनमोनाभौ इष्टसिद्धौविनियोगः सर्वांगेषु इत्य
मृष्यादिन्यासः अथकरन्यासः ॐ ह्रीं वां रुद्रायनमः इत्यं
गुष्ठयोः ईं शिखीसखायनमः तर्जन्योः ईं शिवायनमः

मध्यमयोः ईं त्रिशूलिनेनमः अनामयोः ईं ब्रह्मणेनमः
कनिष्ठिकयोः ईं त्रिपुरांतकायनमः करतलयोः ईं मांसा
शिनेनमः करागयोः ईं दिगंबरायनमः करपृष्ठयोः इति
करन्यासः अथदेहन्यासः ईं भैरवायनमः मूर्ध्नि ईं भीमद
र्शनायनमोललाटे ईं भूतहननायनमः नेत्रयोः ईं सार
मेयानुगायनमः भ्रुवोः ईं भूतनाथायनमः कर्णयोः ईं
प्रेतवाहनायनमः कपोलयोः ईं भस्मांगायनमः नासा
पुटयोः ईं सर्पभूषणायनमः ओष्ठयोः ईं अनादिनिध
नायनमः आस्ये ईं शक्तिहस्तायनमः गले ईं दैत्यघ्ना

श्री॰
५

मनायनमः स्कंदयोः ई अतुलतेजसेनमः बाह्वोः ई
कपालिनेनमः पादयोः ई मुंडमालिनेनमो हृदि ई शांता
यनमः वक्षःस्थले ई कामचारिणेनमः स्तनयोः ई सदा
तुष्टायनमः उदरे ई क्षेत्रेशायनमः पादयोः ई क्षेत्रपाला
यनमः पृष्टे ई क्षेत्रज्ञायनमः नाभौ ई पापौघशामनाय
नमः कक्ष्यां ई वटुकायनमःलिंगे ई रत्नाकरायनमो गु
दे ई रक्तलोचनायनमः ऊर्वोः ई घुर्घुरारावायनमः जा
न्वोः ई रक्तपायिनेनमःजंघयोः ई पादुकासिद्धायनमः
गुल्फयोः ई सर्वेश्वरायनमः पादपृष्टे ई ॐ आपदुद्धार

णायनमः आपादमस्तकांतं सर्वांगेषु व्यापकं कुर्यात् इ
तिदेहन्यासः अथरत्नान्यासः ईंडमरु हस्तायनमः पूर्व
दिशी ईंदंडधारिणेनमः दक्षिणे ओंखड्गहस्तायनमः पश्चि
मे ईंघंटाधारिणेनमः उत्तरे ईंअग्निवर्णायनमः आग्ने
यकोणे ईंदिगंबरायनमः नैरृत्ये ईंसर्वभूतभयायनमः
वायौ ईंइष्टसिद्धिदायनमः ईशाने ईंखेचारिणेनमः ऊर्ध्वे
ईंरौद्ररूपिणेनमः अधः इतिरत्नान्यासः अथषडंगन्यासः
ईंभूतनाथायनमः हृदये ईंआदिनाथायनमः शिरसि।
ईंआनन्दनाथायनमः कवचे ईंसहजानंदनाथायनमः

श्री० ६

6

नेत्रत्रये इंनिःसीमानंदनाथायनमः अस्त्रायफट् इति
षडंगन्यासः अथ मूलषडंगन्यासः क्ष्रांवांहृदयायनमः
क्ष्रींवींशिरसेस्वाहा क्ष्रूंवूंशिखायै० क्ष्रैंवैंकवचा० क्ष्रौंवौंनेत्र
त्रयाय० क्ष्रःवःअस्त्रायफट् इतिमूलषडंगः ध्यानंत्रिविधमा
ख्यातंगुणभेदेननिर्गुणम् ध्यात्वाजपेत्सुसंहृष्टःसर्वान्कामा
नवाप्नुयात् ॐकरकलितकपालःकुंडली दंडपाणि स्तरु
णतिमिरनीलोव्यालयज्ञोपवीती क्रतुसमयसपर्याविघ्न
विच्छेदहेतुर्जयतिवटुकनाथःसिद्धिदःसाधकानाम् फणिध
रफणिनाथोदेवदेवाधिनाथः क्षितिधरक्षितिनाथो

वीरवेतालनाथः निधिपतिनिधिनाथो योगिनी योगिना
थो जयतिवटुकनाथः सिद्धिदः साधकानाम् इतिसर्वसा
धारणंध्यानम् अथविशेषगुणध्यानम् एवंन्यासविधिं
कृत्वाध्यात्वाचतदनंतरम् ध्यानं तस्य प्रवक्ष्यामि यथाध्या
नंपठेन्नरः आदौसात्विकध्यानं शुद्धस्फटिकसंकाशं सहस्रा
दित्यवर्चसम् नीलजीमूतसंकाशंनीलांजनसमप्रभम् अ
ष्टबाहुंत्रिनयनं चतुर्बाहुंद्विबाहुकम् दंष्ट्राकरालवदनंनू
पुरारावसंकुलम् भुजंगमेखलंदेवमग्निवर्णशिरोरुहम्।
दिगंबरंकुमारीशंवटुकाख्यंमहाबलम् खट्वांगमसिपाशं

श्री॰
७

चशूलंदक्षिणबाहुतः डमरुंचकपालंचवरंचाभयमेवच।
आत्मवर्णसमोपेतसारमेयसमन्वितम् ध्यात्वादेवंमहादेवि
पाठंकुर्यात्समाहितः इतिसात्विकध्यानम् अथराजसध्या
नम् वंदेबालंस्फटिकसदृशंकुंडलोद्भासिवक्त्रं दिव्याकल्पै
र्नवमणिमयैःकिंकिणीनूपुराद्यैः दीप्ताकारंविशददशनं
सुप्रसन्नंमहेशं हस्ताब्जाभ्यांवटुकमनिशंमुंडमालेदधानम्
भास्वन्मंडलसन्निभंत्रिनयनंरक्तांगरागस्रजं स्मेरास्यंवर
दंकपालमभयंशूलंदधानंकरैः नीलग्रीवमुदारभूषणयु
तंशीतांशुखंडोज्वलं बंधूकारुणवाससंभयहरंदेवंसदा

भावयेत् इतिराजसध्यानम् अथतामसम् ध्यायेत्रैलो
क्यकांतंशशिसकलधरं मुंडमालंमहेशम् दिग्वस्त्रंपिंगके
शंडमरुमथसृणिंखड्गशूलाभयानि नागंघंटांकपालंकर
सरसिरुहैर्बिभ्रतंभीमदंष्ट्रं सर्पाकल्पंत्रिनेत्रंमणिमयविल
सत्किंकिणीनूपुराढ्यम् इतितामसध्यानम् अथनिर्गु
णध्यानम् शांतंपद्मासनस्थंशशिमुकुटधरं पंचवक्त्रंत्रि
नेत्रं खड्गंशूलंचवज्रंपरशुमुसलके दक्षिणेगे वहन्तम्
नागंपाशंचघंटांप्रलयहुतवहंसांकुशंवामभागे नाना
लंकारयुक्तंस्फटिकमणिनिभंनौमितत्त्वांशिवाख्यम् नागं

श्री· पाशायुतंकपालवरदंखट्वांगमेकेकरे खड्गंशूलमथस्रजं
८ डमरुकंविभ्रत्करैरंकुशम् नग्नःकालवपुर्धरस्त्रिनयनोदं
ष्ट्राकरालाननः पायादूर्ध्वशिरोरुहःफणिलसद्धस्तःस्थलो
8 भैरवः आनीलकुंतलमलक्तकरक्तपाणंमौंजीवृतंस्मित
मनोज्ञमुखारविंदं कल्याणदंडकमनीयकुठारपाणिंवन्दा
महेवटुकनाथमभीष्टसिद्ध्यै क्वाकाशःक्वसमीरणःक्वद
नः हनःक्वापःक्वविश्वंभरा क्वब्रह्माक्वजनार्दनःक्वतरणिःक्वेंदुः
क्वदेवासुराः कल्पांतारभटीनटःप्रमुदितःश्रीसिद्धयोगीश्व
रः क्रीडानाटकनायकोविजयतेदेवोमहाभैरवः ७

देवोमहाभैरवः एवंध्यात्वापठेद्देविनामाष्टशतमुत्तम
म् भैरवोपिप्रहृष्टःस्यात्स्वयंभूःसमहेश्वरः मन्तुनानेन
याप्यास्तांपठेत्स्नानंदमानसः ॐतीक्ष्णदंष्ट्रमहाकायकल्पां
तदहनोपम भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि स्वेत
सर्षपसंयुक्तान्नतताग्निस्तुसाधकः तिष्यापठेन्महादेविदे
वस्यदक्षिणामुखः ॐह्रींवं भैरवोभूतनाथश्चभूतात्मा
भूतभावनः क्षेत्रदःक्षेत्रपालश्चक्षेत्रेशःक्षेत्रियोविराट् ।
श्मशानवासीमांसाशीखर्पराशीखलांतकृत् रक्तपःपान
पःसिद्धःसिद्धिदःसिद्धसेवितः करालःकालशमनःकला

श्री॰ काष्ठातनुः कविः त्रिनेत्रो बभ्रुनेत्रस्तथा पिंगललोचनः
९ शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः अभीरुर्भैर
वीनाथो भूतपो योगिनीपतिः धनदो धनहारी च धनवान्
प्रतिभानवान् नागहारो नागकेशो व्योमकेशः कपालभृ
त् कालः कपालमाली च कमनीयः स्मरांतकः त्रिलोच
लोज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः त्रिनेत्रतनयो डिंबः
शांतः शांतजनप्रियः वटुको वटुवेशश्च खट्वांगवरधारकः
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः धूर्तो दिगंब
रः शूरो हरिणः पांडुलोचनः प्रशांतः शांतिदः शुद्धः शंक

रविप्रियबांधवः अष्टमूर्तिर्निधी शास्त्रज्ञान चक्षुस्तपोमयः
अष्टाधारः षडाधारः सर्पयुक्तः शिखी सखः भूधरोभूधरा
धीशो भूपतिर्भूधरात्मजः कंकालधारी मुंडीच अंत्रयज्ञो
पवीतभृत् जंभणो मोहनः स्तंभी मारणः क्षोभणस्तथा
शुद्धनीलांजनप्रख्यो दैत्यहा मुंडभूषितः बलिभुक् बलि
भुग्नाथो बालोबालपराक्रमः सर्वापत्तारणोदुर्गोदुष्टभू
तनिषेवितः कामीकलानिधिःकांतः कामिनीवशकृद्व
शी सर्वसिद्धिप्रदो वैद्यः प्रभविष्णुः शिवात्मजः श्रीशिव
उवाच अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः मयातेक

श्री. थितं देवि रहस्यं सार्वकामिकम् य इदं पठति स्तोत्रं नामाष्ट
९. शतमुत्तमम् न तस्य दुरितं किंचिन्न च रोगभयं तथा न शत्रु
भ्यो भयं किंचित्प्राप्नुयान्मानवः क्वचित् पातकानां भयं नै
10 व पठतः स्तोत्रमुत्तमम् मारीभये रोगभये तथा चौराग्निजे भ
ये औत्पातिके महाघोरे तथा दुःस्वप्नजे भये बंधने च महा
घोरे पठेत्स्तोत्रमनन्यधीः सर्वं प्रशममायाति भयं भैरवकी
र्तनात् एकादशसहस्रं तु पुरश्चरणमुच्यते यस्त्रिसंध्यं प
ठेन्नित्यं संवत्सरमतंद्रितः स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि
मानवः षण्मासं भूमिकामस्तु पठित्वा प्राप्नुयान्महीम् राजा
शत्रुविनाशार्थं पठेन्मा

साष्टकं यदि रात्रौ वारत्रयं देवि नाशयत्येव शत्रवान् प
ठेन्मासत्रयं मर्त्यो राजानं वशमानयेत् धनार्थी चसुतार्थी
चदारार्थी चैव मानवः पठेन्मासत्रयं देवी वारमेकं तथा नि
शि धनं पुत्रांस्तथादारान्प्राप्नुयान्नात्रसंशयः रोगीरोगा
त्प्रमुच्येत देवि सत्यं न संशयः निगडैश्चापि बद्धो यः कारा
ग्रहनिपातितः शृंखलाबंधनं प्राप्तः पठेच्चैव दिवानिशि
यान्यान्समीहते कामांस्तांस्तां प्राप्नोत्यसंशयः अप्रकाश्यं
परं गुह्यं न देयं यस्यकस्यचित् सुकुलीनाय शांताय ऋज
वे दंभवर्जिते दद्यात्स्तोत्रमिदं पुण्यं सर्वकामफलप्रदम् ॥

श्री· एवं कृत्वा ततो देवी नामाष्टशतमुत्तमम् सन्तोषं परमं प्राप्य
११ सर्वकामफलप्रदम् जया परया भक्त्या सदा सर्वेश्वरीश्वरी मे
रवस्तु प्रसन्नो भूत्स स्वजे परमेश्वरः । इति श्रीविश्वनाथसारो
द्धारतंत्रे उमा महेश्वर संवादे आपदुद्धारण वटुक भैरवस्तो
त्रं संपूर्णम् श्रीः शुभम् सं· १९५५ माघप्र: २९ लिपिकृतं
पंडित कुञ्जलालेन जम्बूपत्तने शुभम् श्रीमन्नरपति श्रीराम
सिंहपठार्थं चेति शुभम् श्रीः ॥

